"तस्य संवृतमन्त्रस्य गूढ़ाकारेङ्गितस्य च"।)
इङ्गुदः, पुं (इङ्गं द्यति अवखण्डयतीति। इङ्ग+दो+क। अस्य उक्।) इङ्गुदीवृक्षः। इत्यमरभरतौ॥
("इङ्गुदन्तिक्तमधुरं स्निग्धोष्णं कफवातजित्"।
इति चरकः॥०॥ विशेषोऽन्यस्त्विङ्गुदीशब्दे ज्ञेयः।)
इङ्गुदी, स्त्री, (इङ्गुद+ङीष्।) वृक्षविशेषः। इङ्गौट इति भाषा। जीयापुता इति तु वङ्गदेशीया प्रमादेन वदन्ति तस्य तु पुत्रजीव इत्यादीनि नामानि प्रसिद्धानि। तत्पर्य्यायः। तापसतरुः २। इत्यमरः॥ हिङ्गुपत्रः ३ विषकण्टः ४ अनिलान्तकः ५ गौरत्वक् ६ तनुपत्रः ७ शूलारिः ८ तापसद्रुमः ९ तीक्ष्णकण्टः १० तैलफलः ११ पूतिगन्धः १२ विगन्धकः १३ कोष्ठफलः १४।
(यथा रघुः १४।८१।
"ता इङ्गुदीस्नेहकृतप्रदीप-
मास्तीर्णमेध्याजिनतल्पमन्तः"॥)
अस्या गुणाः। मदगन्धित्वं। कटुत्वम्। उष्णत्वम्। पेनिलत्वम्। लघुत्वम्। रसायनत्वम्। जन्तुवातामयकफव्रणनाशित्वञ्च। इति राजनिर्घण्टः॥ (अस्य पर्य्यायपूर्ब्बकं गुणानाह।
"इङ्गुदोऽङ्गारवृक्षश्च तिक्तकस्तापसद्रुमः।
इङ्गुदः कुष्ठभूतादिग्रहव्रणविषक्रिमीन्॥
हन्त्युष्णश्वित्रशूलघ्नस्तिक्तकः कटुपाकवान्"।
इति भावप्रकाशः॥) ज्योतिष्मतीवृक्षः। इति रत्नमाला॥ नयापट्की इति भाषा।
इङ्गुलः, पुं, स्त्री, इङ्गुदीवृक्षः। इति भरतो द्विरूपकोषश्च॥
इच्छा, स्त्री, (एषणं इच्छा। इष्+श+टाप्।) मनोधर्म्मविशेषः। तत्पर्य्यायः। आकाङ्क्षा २ वाञ्छा ३ दोहदः ४ स्पृहा ५ ईहा ६ तृट् ७ लिप्सा ८ मनोरथः ९ कामः १० अभिलाषः ११ तर्षः १२। इत्यमरः॥ रुक् १३ इषा १४ श्रद्धा १५ तृष्णा १६ रुचिः १७ मतिः १८ दोहलं १९ छन्दः २० इट् २१। इति जटाधरः॥ (यथा मनौ ५।४५
"योऽहिंसकानि भूतानि हिनस्त्यात्मसुखेच्छया"।)। न्यायमते अस्याः कारणम्। (यथा, भाषापरिच्छेदे। १४८, १४९।)
"निर्दुःखत्वे सुखे चेच्छा तज्ज्ञानादेव जायते।
इच्छा तु तदुपाये स्यादिष्टोपायत्वधीर्य्यदि॥
चिकीर्षाकृतिसाध्यत्वप्रकारेच्छा तु या भवेत्।
तद्धेतुः कृतिसाध्येष्टसाधनत्वमतिर्भवेत्"॥
अस्याः प्रतिबन्धः। "बलवद्दिष्टहेतुत्वमतिः स्यात् प्रतिबन्धिका"। इति भाषापरिच्छेदे १४८॥
इच्छावती, स्त्री, (इच्छा विद्यते यस्याः। इच्छा+मतुप्। मस्य वः।) धनादीच्छायुक्ता स्त्री। तत्पर्य्यायः। कामुका २। इत्यमरः॥
इच्छावसुः, पुं, (इच्छयाभिलाषमात्रेणैव वसु धनं यस्य।) कुवेरः। इति जटाधरः॥
इच्छुः, त्रि, (इच्छतीति। इषधातोर्निपातनात् सिद्धम्।) इच्छाविशिष्टः। आकाङ्क्षायुक्तः। इति व्याकरणम्॥ (यथा, रामायणे।१।४।८।
("शरण्यः शरणेच्छूनां पितुरादेशपालकः"।)
इच्छुकः, पुं, (इच्छु+कन्।) वृक्षविशेषः। इति शब्दचन्द्रिका॥ टावालेवु इति ख्यातः।
इज्जलः, पुं, (एतीति। इ+क्विप्+तुक्; इत् जलमस्य।) हिज्जलवृक्षः। हिजल गाछ इति भाषा। तत्पर्य्यायः। निचुलः २ अम्बुजः ३। इत्यमरः॥ (सपर्य्यायगुणाः यथा, भावप्रकाशे।
"इज्जलो हिज्जलश्चापि निचुलश्चाम्बुजस्तथा।
जलवेतसवद्वेद्यो हिज्जलोऽयं विषापहः"॥)
इज्यः, पुं, (इज्या विद्यते यस्य। इज्या अर्श आद्यच्।) वृहस्पतिः। इति ज्योतिषं शब्दरत्नावली च॥ ("जीवार्किभानुजेज्यानां क्षेत्राणि स्युरजादयः"।)
इज्यः, त्रि, (इज्या पूजास्त्यस्य। अर्शआद्यच्।) गुरुः। पूज्नीयः। इति मेदिनी॥
इज्या, स्त्री, (यजनं इति। यज+भावे क्यप्+टाप्।) दानं। यज्ञः। (यथा, रघुः। १। ६८।)
("सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः")
पूजा। सङ्गमः। इति मेदिनी॥ (कर्म्मणि क्यप्।) गौः। इति राजनिर्घण्टः॥ कुट्टनी। इति त्रिकाण्डशेषः॥
इज्याशीलः, पुं, (इज्यां यज्ञं शीलयति पुनःपुनराचरतीति। इज्या+शील+ण।) पुनःपुनर्यज्ञकर्त्ता। तत्पर्य्यायः। यायजूकः २। इत्यमरः॥
इञ्चाकः, पुं, मत्स्यविशेषः। इति त्रिकाण्डशेषः॥ इँचला मोचाचिङ्ड़ि इति भाषा। (चिङ्गटशब्देऽस्य गुणादयो ज्ञातव्याः॥)
इट गत्यां। (भ्वादिं-परं-सकं-सेट्।) इति कविकल्पद्रुमः॥ एटति। इति दुर्गादासः॥
इट्[ष्]स्त्री, (इष्+क्विप्।) इच्छा। इति जटाधरः॥
इट्चरः, पुं, (एषणमिति इट्। इष्+क्विप्। तेन चरति इति। इष्+चर्+अच्।) षण्डः। इत्यमरः॥ षाँड़ इति भाषा।
इड़ा, स्त्री, (इल्+क+टाप्।) बुधग्रहभार्य्या। सा इक्ष्वाकुराजकन्या। (यथा हरिवंशे,—
"तत्र दिव्याम्बरधरा दिव्याभरणभूषिता।
दिव्यसंहनना चैव इड़ा जज्ञे इति श्रुतिः"॥)
गौः। (यथा, भारते, —
"इड़ाज्यहोमाहुतिभिर्मन्त्रशिक्षाविशारदैः"।)
वचनं। (देवीभेदः। यथा, हरिवंशे,—
'श्रुतिःप्रीतिरिड़ाकान्तिःशान्तिःपुष्टिःक्रिया तथा'।)
पृथ्वी। इति मेदिनी॥ (यथा, महाभारते, घोषयात्रापर्व्वणि २३५।१०।
"पतत्त्रिसङ्घैः स जघन्यरात्रे
प्रबोध्यते नूनमिड़ातलस्थः"।) स्वर्गः। शरीरस्य वामभागस्था नाड़ी। इति हेमचन्द्रः॥ (तथा च सट्चक्रभेदे२ श्लोके।
"मेरोर्वाह्यप्रदेशे शशिमिहिरशिरे सव्यदक्षे निषण्णे, मध्ये नाड़ी सुषुम्ना त्रितयगुणमयी चन्द्रसूर्य्याग्निरूपा"।
"मेरोर्मेरुदण्डस्य वाह्यप्रदेशे वहिर्भागे सव्यदक्षे वामदक्षिणे पार्श्वे शशिमिहिरशिरे चन्द्रसूर्य्यात्मिके नाड्यौ इड़ापिङ्गलानाड़ीद्वयमिति फलितार्थः। निषण्णे वर्त्तेते"। ज्ञानसङ्कलनीतन्त्रे। ८।
"इड़ा नाम सैव गङ्गा यमुना पिङ्गला स्मृता।
गङ्गायमुनयोर्मध्ये सुषुम्ना च सरस्वती॥
एतासां सङ्गमो यत्र त्रिवेणी सा प्रकीर्त्तिता।
तत्र स्नातः सदा योगी सर्व्वपापैः प्रमुच्यते"॥
इयन्तु सकामकर्म्मानुष्ठायिजीवानां पुनरावर्त्तिकारिणी धूममार्गा पितृयानरूपिणी।
अनयोरिड़ापिङ्गलयोर्मध्ये गता सुषुम्नैव ब्रह्मनाड़ी यस्यां नाड्यां इदं सर्व्वं विश्वं प्रतिष्ठितम्। यथा उत्तरगीतायाम्। २ अध्याये।
"इड़ा च वामनिःश्वासः सोममण्डलगोचरा।
पितृयानमितिज्ञेया वाममाश्रित्य तिष्ठति॥१२॥
गुदस्य पृष्ठभागेऽस्मिन् वीणादण्डस्य देहभृत्।
दीर्घास्थि मूर्द्धिपर्य्यन्तं ब्रह्मदण्डेति कथ्यते॥१३॥
तस्यान्ते सुषिरं सूक्ष्मं ब्रह्मनाड़ीति सूरिभिः॥१४॥
इड़ा पिङ्गलयोर्मध्ये सुषुम्ना सूक्ष्मरूपिणी॥
सर्व्वं प्रतिष्ठितं यस्यां सर्व्वगं सर्व्वतोमुखम्"॥१५॥
परं आसामिड़ादीनां नाड़ीनां शोधनमकुर्व्वन् योगी कदाप्यात्मप्रसादं लब्धुं नार्हति तथा च भगवच्छङ्करोक्तयोगशास्त्रे।
"ईश्वितानि समभ्यस्य वाञ्छितानि यथाविधि।
प्राणायामं ततो गार्गि जितासनगतोऽभ्यसेत्॥
मृदासने कुशान् सम्यक् आस्तीर्य्याम्रतमेव च।
लम्बोदरञ्च सम्पूज्य फलमोदकभक्षणैः॥
तदासने सुखासीनः सव्ये न्यस्येतरं करम्।
समग्रीवशिराः सम्यक् संवृतास्यः सुनिश्चलः।
प्राङ्मुखोदङ्मुखोवापि नासाग्रन्यस्तलोचनः॥
अतिभुक्तमभुक्तञ्च वर्ज्जयित्वा प्रयत्नतः।
नाड़ीसंशोधनं कुर्य्यात् उक्तमार्गेण यत्नतः॥
वृथा क्लेशो भवेत्तस्य तच्छोधनमकुर्व्वतः।
नासाग्रे शशभृद्वीजं चन्द्रातपवितानितम्॥
सप्तमस्य तु वर्गस्य चतुर्थं वर्गसंयुतम्।
विश्वमध्यस्थमालोक्य नासाग्रे चक्षुषी उभे॥
इड़या पूरयेद्वायुं वाह्यं द्वादशमात्रकैः।
ततोऽग्निं पूर्ब्बवद्ध्यायेत् स्फुरज्ज्वालावलीयुतम्।
रुषष्ठं विन्दुसंयुक्तं शिखिमण्डलसंस्थितम्॥
ध्यायेद्विरेचयेद्वायुं मन्दं पिङ्गलया पुनः।
पुनः पिङ्गलयापूर्य्य घ्राणं दक्षिणतः सुधीः॥
तद्वद्विरेचयेद् वायुमिड़या तु शनैः शनैः।
त्रिचतुर्वत्सरञ्चापि त्रिचतुर्मासमेव च।
गुरुणोक्तप्रकारेण रहस्येवं समभ्यसेत्"॥)
इड़ाचिका, स्त्री, (इड़ावत् अचति। इड़ा+अच्। ण्वुल्। टाप्+अत इत्वम्।) वरटा। वोल्ता इति भाषा। इति शब्दचन्द्रिका॥
इड़िका, स्त्री, (इड़ा+स्वार्थे क, इत्वम्।) पृथ्वी। इति शब्दरत्नावली॥
इड़िक्कः, पुं, (इड़िक्+कै+ड।) वनच्छगलः। इति हेमचन्द्रः॥
इड्वरः, पुं, (इट्+वृ+अच्।) इट्चरः। वृषः। इत्यमरटीकायां स्वामी॥
इत, इ बन्धे। (इदित्-दिवां-आत्मं-सकं-सेट्।) इ इन्त्यते। इति दुर्गादासः॥